॥ अथ वेदोक्तशिवार्चनपद्धतिप्रारंभः ॥

Acc. No. 17151



श्रीगणेशाय नमः ॥ ॥ श्रीगुरवे नमः ॥ हस्तौपादौप्रक्षाल्य ॥ आस
नारोहणम् ॥ ॐभूर्भुवःस्वःइत्याचमनम् ॥ ॐनमःशिवायेतित्रिवारं
पठेत् ॥ त्र्यम्बकमितिविभूतिधारणम् ॥ पीठेलिंगस्थापनम् ॥ गणप-
त्यादिमंडलेअक्षतपुंजस्थापनम् ॥ ततःस्वस्तिवाचनम् ॥ प्रतिज्ञासं
कल्पः ॥ गणपतिपूजनम्॥ ततोवरणसंकल्पः ॥ ततःनंदीवीरभद्रौस्वा
मिकार्तिकंकुबेरंकीर्तिमुखंचपूजयेत् ॥ ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाः
स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्ति
नोबृहस्पतिर्दधातु ॥ १ ॥ पयःपृथिव्याम्पयओषधीषुपयोदिव्यु

न्तरिक्षेपयोधाः ॥ पयस्वतीःप्रदिशःसंतुमह्यम् ॥ २ ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्त्वा ॥ ३ ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमा देवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवा देवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता ॥ ४ ॥ द्यौःशान्तिरन्तरिक्षꣳशांतिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशांतिर्ब्रह्मशान्तिःसर्व्वꣳ शांतिःशांतिरेवशान्तिःसामा शान्तिरेधि ॥ ५ ॥ सुशान्तिर्भवतु ॥ ॐविश्वानिदेवसवितर्दुरि

तानिपरासुव ॥ यद्रुद्रन्तन्नऽआसुव ॥ ६ ॥ इमारुद्रायतवसेकपर्दि
नेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेविश्वम्पु
ष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥७॥ एतन्तेदेवसवितर्य्यज्ञम्प्राहुर्बृहस्प्प-
तयेब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञपतिन्तेनुमामव ॥ ८ ॥ मनोजूतिर्जु
षतामाज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँय्यज्ञꣳ समिमन्द
धातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ ९ ॥ एषवैप्प्रति
ष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्तेसुवर्गमेवप्प्रातिष्ठितुम्भवति ॥ १० ॥
गणानान्त्वा गणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳ हवामहे

निधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमंजानिगर्भ्भधमा
त्त्वमंजासिगर्भ्भधम् ॥ ११ ॥ नमोगुणेभ्योगुणपतिभ्यश्चवो
नमो नमोव्व्रातेभ्योव्व्रातपतिभ्यश्चवोनमोनमो गृत्सेभ्यो गृत्सप
तिभ्यश्चवोनमोनमोव्विरूपेभ्योव्विश्वरूपेभ्यश्चव्वोनमः ॥ १२ ॥
सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो
विघ्ननाशो विनायकः ॥ १३ ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजा
ननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ १४ ॥ विद्यारम्भे
विवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते

॥ १५ ॥ ॐभूर्भुवः स्वः अत्रमंडलेइहागच्छसुप्रातिष्ठोवरदोभवममपू
जांगृहाण श्रीगणाधिपतयेनमः ॥ अक्षतान्क्षिपेत् ॥ ॐतत्सदद्यब्रह्म
णोद्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे अष्टाविंशतितमे
युगेकलौप्रथमचरणे जम्बुद्वीपे भरतखंडे आर्यावर्तैकदेशे अमुकसंव
त्सरे अमुकऋतौ अमुकमासे अमुकपक्षे अमुकातिथौ अमुकवासरे य
थायोगकरणमुहूर्त्ते वर्तमाने अमुकगोत्रः अमुकशर्मा श्रुतिस्मृतिपुरा
णोक्तफलप्राप्तिकामः चतुर्वर्गफलप्राप्त्यर्थं प्रदोषादियामचतुष्टया
धिकरणकरुद्रीपाठसहितं चतुष्कृत्वो नार्म्मदाशिवालिंगपूजनमहंक

रिष्ये । तदंगत्वेनगणपत्यादिपूजनंचकरिष्ये॥ततो ब्रिश्श्वानिदेवसावितरितिपंचप्रतिष्ठामंत्रान्पठेत् ॥ ॐगणानान्त्वेतिमंत्रेणावाहनपुष्पासनपाद्यार्घाचमनीयस्नानीयपुनराचमनीयवस्त्रयज्ञोपवीतगंधाक्षतपुष्पधूपदीपनैवेद्यतांबूलनमस्कारप्रदक्षिणाजपा इति षोडशोपचारैर्गणपतिंपूजयेत् ॥ मूलमंत्रस्य जपः ॥ ततः प्रार्थना ॥ नमोगुणेभ्यः० सुमुखश्चैकदंतश्चकपिलोगजकर्णकः लंबोदरश्चविकटोविघ्ननाशोविनायकः धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः द्वादशैतानिनामानियः पठेच्छृणुयादपि विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा संग्रामेसंकटेचैवविघ्नस्तस्यनजायते शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये अगजानन० इतिगणपतिपूजनम् ॥ ततोवरणसंकल्पः ॥ ॐतत्सद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे अष्टाविंशतितमेयुगेकलौप्रथमचरणेजंबूद्वीपे भारतखंडे

आर्यावर्त्ते अमुकसंवत्सरे अमुकऋतौ अमुकमासे अमुकपक्षे अमुक तिथौ अमुकवासरे यथायोगकरणमुहूर्त्ते वर्तमाने अमुकगोत्रः अमुक शर्म्मा श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः चतुर्वर्गफलप्राप्त्यर्थं कर्त्त व्यप्रदोषादियामचतुष्टयाधिकरणकरुद्रीपाठसहितं चतुष्कृत्वो नार्म्मदशिवलिंगपूजनं ब्राह्मणद्वारा कारयितुमेभिर्वरणद्रव्यैर्यथानाम गोत्रान्यथापरिमितब्राह्मणानहं वृणे ॥ व्रतेनदीक्षामाप्नोतिदीक्षया प्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ इतिब्राह्मणो वदेत् ॥ ततःनंदीश्वरपूजनमाह ॥ आयङ्गौः पृश्निरक्र

मुदसंदन्मुतरंम्पुरः ॥ पितरंश्चप्रयन्त्स्वं÷ ॥ षोडशोपचारैर्नंदीश्वरं पूजयेत् ॥ ततः प्रार्थना ॥ प्रैतुंव्वाजीकनिंक्रदुन्नानंदद्रासंभु÷पत्वां ॥ भरंन्नग्निम्पुंरीष्युम्मापुाद्यायुंषःपुरा ॥ इतिनंदीश्वरंपूजयेत् ॥ १ ॥ ततोवीरभद्रपूजनम् ॥ भुद्रङ्कर्णेभि÷शृणुयामदेवाभुद्रम्पंश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवाहितुँयदायुं÷ ॥ षोडशोपचारैर्वीरभद्रं पूजयेत् ॥ ततः प्रार्थना ॥ भुद्रोनोऽअग्निरा हुंतोभुद्रारांति÷सुंभगभुद्रोऽअध्वर÷ ॥ भुद्राऽउत्तप्प्रशस्तय÷ ॥ इतिवी रभद्रं पूजयेत् ॥ ततः स्वामिकार्तिकपूजनमाह ॥ यदक्रन्द÷प्रथुम

आयमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहारिणस्यबाहूऽउपस्तुत्त्युम्महिजातन्तेऽअर्ब्बन् ॥ षोडशोपचारैःस्वामिकार्त्तिकंपूजयेत् ॥ ततःप्रार्थना ॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव॥ तत्रुऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्ववाहाशर्म्मयच्छतु ॥ इतिस्वामिकार्तिकंप्रार्थयेत् ॥ ततःकुबेरपूजनमाह ॥ कुविदङ्गयवमन्तोयवञ्चिद्यथादान्त्यनुपूर्ववियूय ॥ इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्तिंयजान्ति ॥ षोडशोपचारैःकुबेरंपूजयेत् ॥ ततःप्रार्थना ॥ ध्रुयर्ठ्सोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्त ः सचेमहि ॥

इतिकुबेरंप्रार्थयेत् ॥ ततःकीर्तिमुखपूजनमाह ॥ असवेस्वाहाव्वसवे स्वहाऽग्निभुवेस्वाहाव्विवस्वते स्वाहागणश्रियेस्वाहागुणपतये स्वाहाभिभुवेस्वाहाधिपतयेस्वाहा शुषायस्वाहासर्ठ्सर्प्पाय स्वाहाचन्द्रायस्वाहाज्ज्योतिषेस्वाहा मलिम्म्लुचायस्वाहादिवापुतयतेस्वाहा ॥ षोडशोपचारैःकीर्तिमुखंपूजयेत् ॥ ततःप्रार्थना ॥ ओजश्चमे सहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेङ्गानिचमेस्थानिचमे परू ँषिचमेशरीराणिचमऽआयुश्चमेजुराचमेयज्ञेनकल्पन्ताम् ॥ इतिकीर्तिमुखंप्राथेयत् ॥ अथात्मविन्यासः॥ १ ॥ यातेरुद्राशिवातनूर

चंन.

॥ ६ ॥

घोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिंशन्ताभिचाकशी
हि ॥ शिखायाम् ॥ १ ॥ अस्मिन्नमहत्यर्णवेन्तरिक्षेभवाऽअधि ॥
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ शिरासि ॥ २ ॥ असंख्या
तासहस्राणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषाꣳसहस्रयोजनेवधन्वा
नितन्मसि ॥ ललाटे ॥ ३ ॥ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः॥
प्रजावन्तःसचेमहि ॥ भ्रुवोर्मध्ये ॥ ४ ॥ त्र्यम्बकँयजामहेसुगन्धिं
म्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥
नेत्रयोः ॥ ५ ॥ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योर्ज्योति

ज्ज्योतिःसूर्यः स्वाहा ॥ अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥ ज्योतिःसूर्यः सूर्यो ज्योतिः स्वाहा ॥ तृतीयनेत्रे ॥ ६ ॥ नमः स्रुत्यायच पथ्यायच नमः कट्यायच नीप्यायच नमः कुल्यायच सरस्यायच नमो नादेयायच वैशन्तायच ॥ कर्णयोः ॥ ७ ॥ मानस्तोके तनये मान आयुषि मानो गोषु मानोऽअश्वेषु रीरिषः ॥ मानो वीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥ नासिकयोः ॥ ८ ॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानांमुखाशिवोनः सुमनाभव ॥ मुखे ॥ ९ ॥ नमोवश्चते

परिव्वञ्चंतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमते तस्कराणा म्पतयेनमोनमःसृकायिभ्योजिघाꣳसद्भ्योमुष्णताम्पतये नमोन मोसिमद्भ्योनक्तञ्चरद्भ्योविविकृन्तानांपतयेनमः ॥ ग्रीवायाम्॥ १० ॥ नीलग्रीवाःशितिकण्ठादिवꣳरुद्राऽउपश्रिताः ॥ तेषाꣳसहस्रयो जुनेवधन्वानितन्मसि ॥ कंठदेशे ॥ ११ ॥ नमस्तुऽआयुधायाना ततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्युान्तवधन्वने ॥ बाह्वोः ॥ १२ ॥ येतीर्थानि प्रचरन्ति सृकाहस्तानिषङ्गिणः ॥ तेषा ꣳ सहस्रयोजुनेवधन्वानितन्मसि ॥ हस्तयोः ॥ १३ ॥ नमोज्ज्येष्ठा

यंचकनिष्ठायंचनमः पूर्वजायंचापरजायंचनमो मध्यमायं चापग
ल्भायंचनमोजघन्यायंचबुद्ध्न्यायंच ॥ अंगुलिषु ॥ १४ ॥ नमः
पुर्णायंच पर्णशदायंचनमऽउद्गुरमाणायंचाभिघ्नतेचु नमऽआखिद
तेंचप्प्रखिदतेंचनमऽइषुकृद्भ्योंधनुष्कृद्भ्यंश्चवोनमोनमोवः किरिके
ब्भ्योदेवानाऽहृदंयेभ्यो नमोविचिन्वत्केब्भ्योनमोविक्षिणत्के
भ्योनमऽआनिर्हतेभ्यः ॥ हृदये ॥ १५ ॥ नमोगणेभ्योगणपतिभ्य
श्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो नमो गृत्सेभ्यो
गृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्यो विश्वरूपेभ्यश्चवो नमः॥

पृष्ठे ॥ १६ विकिरिद्रुग्विलोहितनमस्तेऽअस्तु भगवः ॥ यास्ते
सहस्रꣳहेतयोन्यमस्मान्निवपन्तुताः ॥ उदरे ॥ १७ ॥ नमः शं
म्भवायचमयोभवायचनमः शंकरायच मयस्करायं चनमः शिवा
यंचशिवतरायच ॥ दक्षिणकुक्षौ ॥ १८ ॥ द्रापेऽअन्धसस्पतेदरिद्रं
नीललोहित ॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनुः
किञ्चनाममत् ॥ वामकुक्षौ ॥ १९ ॥ हिरण्यगर्भः समवर्तताग्रेभूत
स्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवा
यहविषाविधेम ॥ नाभौ ॥ २० ॥ मीढुष्टमशिवतमशिवोनः सुमना

भव ॥ पुरमेव्वक्षऽआयुधान्निधायकृत्तिंव्वसानऽआचरुपिनाकुम्बिभ्र
दागहि ॥ कट्याम् ॥ २१ ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽ
अस्तुमामाहिꣳसीः ॥ निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरा
स्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥ लिंगे ॥ २२ ॥ इमारुद्रायतव
सेकपार्द्दनेक्षयद्वीरायप्रभरामेहमतीः ॥ यथाशमसद्द्विपेदुचतुष्प
देव्विश्वम्पुष्टंग्रामेऽअस्मिन्ननातुरम् ॥ गुह्ये ॥ २३ ॥ इषेत्वोर्ज्जेत्वा
व्वायवस्थदेवोवः सविता प्रार्प्पयतुश्रेष्ठतमायु कर्म्मणऽआप्यायध्व
मघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मावस्तेनऽ

ईशतुमाघशंऽसोध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य
पशून्पाहि ॥ बृषणयोः ॥ २४ ॥ मानोमहान्तमुतमानोऽअर्भ्भक
म्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरं
म्मानःप्रियास्तन्वोरुद्ररीरिषः ॥ ऊर्वोः ॥ २५ ॥ एषतेरुद्रभागःसु
हस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ जा
न्वोः ॥ २६ ॥ नमोज्ज्येष्ठायचकनिष्ठायचनमःपूर्व्वजायचापरजा
यचनमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायच ॥
जंघयोः ॥ २७ ॥ नमोह्रस्वायचवामनायचनमोवृद्धायचसंवृधेचन

मोऽग्र्यायचप्रथमायंच ॥ गुल्फयोः ॥ २८ ॥ येपथाम्पार्थिरक्षयऽ
ऐलबृदाऽआयुर्ऱ्षधः ॥ तेषाꣳसहस्रयोजुनेवृधन्वानितन्मासि ॥
पादयोः ॥ २९ ॥ अङ्क्ष्यवोचदधिवुक्ताप्प्रथमोदैव्योभिषक् ॥ अहीं
श्चसर्व्वाँअुम्भयुन्त्सर्व्वाश्चयातुधान्त्र्युधराचीःपरासुव ॥ कवचम् ॥
॥ ३० ॥ नमो बिल्मिनेचकवचिनेचुनमोवर्म्मिणेचव्वरूथिनेचुन
मःश्रुतायचश्रुतसेनायचुनमोदुन्दुभ्यायचाहनन्त्र्यायच ॥ अस्त्रम्
॥ ३१ ॥ व्विज्यन्धनःकपर्दिनोव्विशल्प्यो बाणवा ऽउत ॥ अने
शन्नस्युषाऽइषवऽआभरंस्यनिषङ्गधिः ॥ धनुः ॥ ३२ ॥ यत्रबाणाः

सुम्पतन्तिकुमारास्त्रिंशिषाऽइव ॥ तन्नुऽइन्द्रोबृहस्पतिरदितिःशर्म्म
यच्छतुत्रिशरवाहुशर्म्मयच्छतु ॥ बाणः ॥ ३३ ॥ त्रिकिरिद्रविलो
हितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्यमस्मान्निवपन्तु
ताः ॥ खड्गः ॥ ३४ ॥ यऽएतावन्तश्चभूयांऽसश्चदिशोरुद्रावितं
स्थिरे ॥ तेषांऽसहस्रयोजनेवधन्वानितन्मसि ॥ दिग्बन्धनम् ॥
॥ ३५ ॥ एवंन्यासविधिंकृत्वाशिवोहमितिभावयेत् ॥ एवंशिवलिंगेऽ
पिन्यासविधिंकुर्यात् ॥ मानोमहान्तमुतमानोऽअर्भकम्मानुऽउक्षं
न्तमुतमानंऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्रिया

स्तुन्वोरुद्ररीरिषः ॥ आवाहनम्॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरंशन्ताभिचाकशीहि ॥ पुष्पासनम्॥ २॥ यामेषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रतांकुरुमाहिंठ्सीःपुरुषञ्जगत् ॥ पाद्यम् ॥ ३ ॥ शिवेनवचसात्वागिरिशाच्छावदामसि ॥ यथानःसर्व्वमिज्जगदयक्ष्मठ्सुमनाऽअसत् ॥ ॥ अर्घः ॥ ४ ॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥अहीꣳश्चसर्वाञ्जम्भयन्त्सर्व्वाꣳश्चयातुधान्योधराचीःपरासुव । आचमनम् ॥ ॥ ५ असौयस्ताम्म्म्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ॥ येचैनठ्रुद्राऽ

अभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे ॥ स्नानम् ॥ ६ ॥ अ
थपंचामृतस्नानम् ॥ आप्यायस्वेतिगौतमऋषिः सोमोदेवतागाय
त्रीछन्दःक्षीरस्नानेविनियोगः ॥ आप्यायस्वसमेतुतेविश्वश्वतः सो
मवृष्ण्यम् ॥ भवावाजस्यसंगथे ॥ ७ पयःपृथिव्याम्पयऽओष
धीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीःप्रदिशःसन्तुमह्यम् ॥
पयःस्नानम् ॥ ८॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ॥
येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे॥ ९ ॥ दे
वस्यत्त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ शुद्ध

स्नानम् ॥ १० ॥ दधिक्राव्णोइत्यस्यदधिक्राव्णऋषिः सुराभिर्देव
ताऽनुष्टुप्छन्दोदधिस्नानेविनियोगः ॥ दधिक्राव्णोऽकारिषमुि
ष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत्
॥ दधिस्नानम् ॥ ११ ॥ असौयः०॥ १२ ॥ देवस्यत्त्वा०॥शुद्धस्नानम्
॥ १३ ॥ शुक्रमसीत्यस्ययजुषःप्रजापतिर्ऋषिराज्यंदेवताऽनुष्टुप्छं
दःआज्यस्नानेविनियोगः ॥ शुक्रमसिज्योतिरसितेजोसि ॥ घृतव
तीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवी
वरुणस्यधर्म्मणाविष्कभिते ऽअजरेभूरिरेतसा ॥ १४ ॥ घृतंघृतपा

वानः पिबतु वसाँ वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥ दिशः ष्ठ्रादिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा ॥ घृतस्नानम् ॥ ॥ १५ ॥ असौ यः० ॥ १६ ॥ देवस्य त्वा० ॥ शुद्धस्नानम् ॥ १७ ॥ मधु वाताऽऋतायते मंत्रस्य गौतम ऋषिर्मधुर्देवता गायत्री छंदो मधुस्नाने विनियोगः ॥ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वोषधीः ॥ १८ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौर स्तु नः पिता ॥ १९ ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्य्यः ॥ माध्वीर्गावो भवन्तु नः ॥ मधुस्नानम् ॥ २० ॥ असौ यः ० ॥ २१ ॥

देवस्यत्त्वा ० ॥ शुद्धस्नानम् ॥२२॥ स्वादुःपवस्वेतिमंत्रस्यवेणुर्ऋषिः सोमात्मिकाशर्करादेवता जगतीछंदःशर्करास्नानेविनियोगः ॥ स्वादुः पवस्वदिव्यायुजन्मनेस्वादुरिन्द्रायसुहवीतुनाम्ने ॥ स्वादुर्मित्रायवरुणायवायवे बृहस्पतयेमधुमाँ२॥ऽअदाभ्यः ॥ २३ ॥ अपाꣳरसमुद्यसुर्ठ्सूर्य्येसन्तर्ठ्समाहितम् ॥ अपाꣳरसस्यु योरसुस्तँवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टं गृह्णाम्येषतु योनिरिंद्रायत्वाजुष्टतमम्॥शर्करास्नानम्॥२४॥असौयः० ॥२५॥ देवस्यत्त्वा० शुद्धस्नानम् ॥ २६ ॥ अद्ध्वर्यवोचदाधिवक्ताप्रथुमोदैव्योभिषक् ॥

अहीँश्चसर्वाञ्जुम्भयन्त्सर्व्वाश्चयातुधान्योधराचीःपरासुव ॥ पुनरा
चमनीयम् ॥ २७ ॥ असौयोवसर्प्पतिनिलग्ग्रीवोविलोहितः ॥ उतैनं
गोपाऽअदृशन्नदृशन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ वस्त्रम् ॥ २८ ॥
परिधास्यैषशोधास्यैदीर्घायुत्त्वायजरदाष्टिरशि शतञ्च जीवामिशर
दःपुरूचीरायस्पोषमभिसंव्ययिष्ये ॥ वस्त्रेणकटिबन्धनम् ॥२९ ॥
नमोस्तुनीलग्ग्रीवायसहस्त्राक्षायमीढुषे ॥ अथोयेअस्युसत्त्वानो
हन्तेभ्योकरन्नमः ॥ यज्ञोपवीतमितिमंत्रस्यपरमेष्ठीऋषिस्त्रिष्टुप्छं
दोलिंगोक्तादेवतायज्ञोपवीतपरिधानेविनियोगः ॥ यज्ञोपवीतंपरमं

पवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञो
पवीतंबलमस्तुतेजः ॥ यज्ञोपवीतम् ॥ ३० ॥ प्रमुञ्चधन्वनस्त्वमुभ
योरार्त्न्योर्ज्ज्यार्म् ॥ याश्चतेहस्तइषवःपराताभगवोवप ॥ ३१ ॥
गन्धोहैवास्यसुगन्धितेजनन्तन्नत्सुगन्धितेजनम्भवति गन्धेनैवैन
मेतत्समर्द्धयति ॥ गंधः॥३२॥ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत॥
अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ अक्ष
ताः ॥ ३३ ॥ विज्ज्यन्धनुःकपर्द्दिनोविशल्ल्यो बाणवाँऽउत ॥
अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ ३४ ॥ याःफलिनीर्य्या

ऽअफुलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ पुष्पाणि ॥ ३५ ॥ नमोबिल्मिनेचकवाचिनेचनमोवर्म्मिणे चवरूथिनेचनमःश्रुतायचश्रुतसेनायचु नमो दुन्दुभ्न्यायचाहनन्यायच ॥ ३६ ॥ अमृतोद्भवंश्रीवृक्षंशङ्करस्यसदाप्रिय। तत्तेशम्भोप्रयच्छामिबिल्वपत्रंसुरेश्वर ॥ त्रिशाखैर्बिल्वपत्रैश्चअच्छिद्रैः कोमलैः शुभैः ॥ तवपूजांकरिष्यामिअर्चयेपरमेश्वर ॥ गृहाणबिल्वपत्राणिसपुष्पाणिमहेश्वर ॥ सुगन्धीनिभवानीशशिवत्वंकुसुमप्रिय ॥ बिल्वपत्राणि ॥ ३७ ॥यातेहेतिर्म्मीढुष्टमहरन्तेबभूवतेधनुः॥

तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ३८ ॥ धूरसिधूर्व्वधू
र्व्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वतितन्धूर्व्वंयंवुयन्धूर्वामः ॥ देवानामसिव्व
ह्नितमꣳसस्नितमम्पप्रितमजुष्टंतमन्देवहूतंमम् ॥ धूपः॥ ३९॥पारं
तेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयऽइषुधिस्तवारेऽअ
स्मान्निधेहितम् ॥ ४० ॥ अग्निर्ज्योतिर्ज्योतिरग्निꣳस्वाहासूर्य्यो
र्ज्योतिर्ज्योतिः सूर्य्यꣳस्वाहा ॥ अग्निर्व्वर्चोर्ज्योतिर्व्वर्च्चꣳस्वाहा ॥
सूर्य्योवर्च्चोर्ज्योतिर्व्वर्च्चꣳस्वाहा ॥ ज्योतिःसूर्य्यꣳसूर्य्योर्ज्योतिः
स्वाहा ॥ दीपः ॥ ४१ ॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशी

र्य्यशुल्यानांमुखांशिवोनः॑सुमनाभव ॥ ४२ ॥ अन्नपुतेन्नस्यनोदेह्य
नमीवस्यशुष्मिणः॑ ॥ प्रप्रदातारन्तारिषऽउर्ज्जन्नोधेहि द्विपदेचतुष्प
दे ॥ नैवेद्यम् ॥ ४३ ॥ अद्धचवोचदधिवुक्ताप्प्रथमोदैव्योभिषक् ॥
अहीँश्चसर्व्वाँजम्भयन्त्सर्व्वाश्चयातुधान्योधराचीःपरासुव ॥ आच
मनम् ॥ ४४ ॥ नमस्तऽआयुधायानातताय धृष्णवे ॥ उभाभ्यामु
ततेनमोबाहुभ्यान्तवधन्वने ॥ मुखवासः ॥ ४५ ॥ नमः॑पुर्णायचप
र्णशुदायचनमऽउद्गुरमाणायचाभिघ्नतेच नमऽआखिदतेचप्रखिद
तेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाठं

हृदयेभ्योनमोविचिन्वुत्केभ्योनमऽआनिर्हतेभ्यः ॥ तांबूलम् ॥ ४६ ॥ हिरण्यगुर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मदेवायहविषाविधेम ॥ दक्षिणा ॥ ४७ ॥ अथध्यानन् ॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकम् ॥ गं गाधरंदशभुजंसर्वाभरणभूषितम् ॥ ४८ ॥ नीलग्रीवंशशांकांकंनाग यज्ञोपवीतिनम्॥ व्याघ्रचर्म्मोत्तरीयंचवरेण्यमभयप्रदम् ॥ ४९ ॥ क मंडलवक्षसूत्राभ्यामन्वितंशूलपाणिनम् ॥ ज्वलंतं पिङ्गलजटाशि खामुद्योतकारिणम्॥ ५० ॥अमृतेनाप्लुतंहृष्टमुमादेहार्द्धधारिणम् ॥

दिव्यसिंहासनासीनंदिव्यभोगसमन्वितम् ॥ ५१ ॥ दिग्देवतासमा
युक्तंसुरासुरनमस्कृतम् ॥ नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिनमीशानमेवंवैविश्वरूपिणम् ॥ गौरींचतुर्भुजां चंडींत्रिने
त्रांमुकुटोज्ज्वलाम् ॥ पद्मदर्पणहस्तांचवरदाभयहस्तकाम्॥ दिव्यव
स्त्रपरीधानांदिव्यालंकारभूषिताम् ॥ प्रसन्नवदनांध्यायेच्छिवोत्संगे
तुवामतः ॥ एवंध्यात्वाद्विजः सम्यक्ततोयजनमारभेत् ॥ ५२ ॥ पु
ष्पोदकेनतर्प्पयेत् ॥ ॐ भवंदेवंतर्प्पयामि ॥ १ ॥ ॐ शर्वंदेवंतर्प्पयामि
॥ २ ॥ ॐ ईशानंदेवंतर्प्पयामि ॥ ३ ॥ ॐ पशुपतिंदेवंतर्प्पयामि ॥४॥

ॐरुद्रंदेवंतर्प्पयामि ॥ ५ ॥ ॐ उग्रंदेवंतर्प्पयामि ॥ ६॥ ॐ भीमंदेवंत
र्प्पयामि ॥ ७॥ ॐ महांतंदेवंतर्प्पयामि॥ ८॥ ॐ देवदेवंतर्प्पयामि
॥ ९ ॥ ॐ ज्येष्ठायनमः ॥ पुनराचमनीयम् ॥ १॥ॐश्रेष्ठायनमः॥ म
धुपर्कः ॥ २ ॥ मधुपर्कंगृहाणेशसर्वदामधुपर्कपः ॥ मधुपर्कप्रदानेन
प्रीतोभवमहेश्वर ॥ २ ॥ ॐकालायनमः ॥ गंधः ॥ ३ ॥ॐकलविक
रणायनमः । पुष्पाणि॥४॥ॐसर्वभतदमनायनमः ॥ धूपः ॥५॥ॐम
नोन्मनायनमः ॥दीपः ॥ ६ ॥ॐभवोद्भवायनमः ॥नैवेद्यम्॥७ ॥अ
थाष्टौपुष्पाञ्जलयः ॥ ॐभवायदेवायनमः ॥ १ ॥ ॐशर्वायदेवाय

नमः॥ २ ॥ ॐईशानायदेवायनमः ॥ ३ ॥ ॐपशुपतयेदेवायनमः
॥ ४ ॥ॐरुद्रायदेवायनमः ॥ ५ ॥ ॐउग्रायदेवायनमः ॥ ६ ॥ॐभी
मायदेवायनमः ॥ ७ ॥ ॐमहतेदेवायनमः ॥ ८ ॥ॐ भवस्यदेवस्य
पत्न्यैनमः ॥ १ ॥ॐशर्वस्यदेवस्यपत्न्यैनमः ॥ २ ॥ ॐईशानस्यदे
वस्यपत्न्यैनमः ॥ ३ ॥ ॐपशुपतेर्देवस्यपत्न्यैनमः ॥ ४ ॥ ॐरुद्रस्य
देवस्यपत्न्यैनमः ॥ ५ ॥ ॐउग्रस्यदेवस्यपत्न्यैनमः ॥ ६ ॥ ॐभीम
स्यदेवस्यपत्न्यैनमः ॥ ७॥ ॐमहतोदेवस्यपत्न्यैनमः ॥ ८ ॥ अघो
रेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेस्तुरु

द्ररूपेभ्यः ॥ १ ॥ॐतत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥ २ ॥ ॐशर्वायक्षितिमूर्त्तयेनमः ॥ १ ॥ ॐभवायजल मूर्त्तयेनमः॥ २ ॥ ॐरुद्रायाग्निमूर्त्तयेनमः ॥ ३ ॥ ॐ उग्रायवायुमूर्त्त येनमः ॥ ४ ॥ ॐ भीमायाकाशमूर्त्तयेनमः ॥ ५ ॥ ॐ पशुपतयेयज मानमूर्त्तयेनमः ॥ ६ ॥ ॐ महादेवायसोममूर्त्तयेनमः ॥ ७ ॥ ॐ ई शानायसूर्य्यमूर्त्तयेनमः ॥ ८ ॥ एवंसंपूज्य ततः सहस्रघटैः स्नप नम् ॥ ॐ नमः शिवायेतिजपम् ॥ ॐ अस्य श्रीषडक्षरशिवमंत्रस्य वामदेवऋषिः पंक्तिश्छंदः सदाशिवोदेवता पुरुषार्थचतुष्टयसिद्धय

र्थंजपेविनियोगः॥ वामदेवायऋषयेनमः शिरसि॥ १॥ पंक्तिच्छंदसे
नमोमुखे॥ २॥ सदाशिवायदेवतायैनमः हृदये॥ ३॥ चतुर्विधपुरु
षार्थसिद्ध्यर्थंजपेविनियोगःइतिकृतांजलिर्वदेत्॥ ॐहृदयायन
मः॥ १॥ न शिरसेस्वाहा॥ २॥ मः शिखायैवषट्॥ ३॥ शि कव
चायहुम्॥ ४॥ वा नेत्रत्रयायवौषट्॥ ५॥ य अस्त्रायफट् ६॥ स्तो
त्रंपठेत्॥ ओंकारंबिंदुसंयुक्तंनित्यंध्यायंतियोगिनः॥ कामदंमोक्षदं
चैवओंकारायनमोनमः॥ १॥ नजातिर्नमृतिर्यस्यक्षयोयस्यनवि
द्यते॥ नमंतिदेवतास्सर्वानकारंतंनमाम्यहम्॥ २॥ महादेवंमहावक्त्रं
महाध्यानपरायणम्॥ महापापहरंदेवंमकारंतंनमाम्यहम्॥ ३॥ शि

वात्परतरोनास्तिशिवशास्त्रेषुनिश्चयः ॥ शमंतिसर्वपापानिशकारंतं नमाम्यहम् ॥ ४ ॥ वाहनंवृषभोयस्यवासुकिःकंठभूषणम् ॥ वामेश क्तिधरंदेवंवकारंतंनमाम्यहम् ॥ ५ ॥ यत्रयत्रस्थितोदेवःसर्वव्यापी महेश्वरः॥योगुरुःसर्वदेवानांयकारंतंनमाम्यहम् ॥ ६ ॥ इदंषडक्षर स्तोत्रंप्रातरुत्थाययःपठेत् ॥ मुच्यतेसर्वपापेभ्यः शिवलोकंसगच्छ ति॥७॥ इतिषडक्षरस्तोत्रम् ॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजा तःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहवि षाविधेम ॥ १ ॥ आरात्रिपार्थिवर्ठरजःपितुरप्रायिधामभिः ॥ दिवःस

दाꣳसिबृहतीविवितिष्ठसऽआत्वेषद्वर्त्ततेतमः ॥ २ ॥ यज्ञेनयज्ञमयज
न्तदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्र
पूर्वेसाध्याःसंतिदेवाः ॥ १ ॥ ॐराजाधिराजायप्रसह्यसाहिने ॥ नमो
वयंवैश्रवणायकुर्महे ॥ १ ॥ समेकामान्कामकामायमह्यम् का
मेश्वरोवैश्रवणो ददातु ॥ २ ॥ कुबेरायवैश्रवणाय महाराजायनमः ॥
ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं
राज्यं माहाराज्यमाधिपत्यमयं समंतपर्य्यायी स्यात् सार्वभौमः
सार्वायुष (ष) आंतादापरार्धात् पृथिव्यै समुद्रपर्य्यंताया एकराडिति॥
तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ॥

आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ ॥ ॥ ॥

ॐअग्निर्देवतावातोदेवतासूर्योदेवताचंद्रमादेवता वसवोदेवतारुद्रोदेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेंद्रो देवता वरुणोदेवता ॥ १ ॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तं मुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः ॥ १ ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे ॥ ॥ इतिवेदोक्तशिवार्चनम् ॥ ॥ ॥ ॥

॥ श्रीगणेशायनमः ॥ ॥ ॐ नमोमृत्युञ्जयाय ॥ नंदिकेश्वरउवाच ॥ कैलासस्योत्तरे शृङ्गे शुद्धस्फ
टिकसन्निभे ॥ तमोगुणविहीनेतुजरामृत्युविवार्जिते ॥ १ ॥ सर्वतीर्थास्पदाधारेसर्व्वज्ञानकृतालये॥कृतांज
लिपुटोब्रह्माध्यानशीलःसदाशिवम् ॥ २॥पप्रच्छप्रणतोभूत्वाजानुभ्यामवनिंगतः॥सर्वार्थसम्यगाधारंब्र
ह्मालोकपितामहः ॥ ३ ॥ ब्रह्मोवाच ॥ ॥ केनोपायनदेवेशचिरायुर्लोमशोऽभवत् ॥ तन्मेब्रूहिमहेशान
लोकानांहितकाम्यया ॥ ४ ॥ श्रीसदाशिवउवाच ॥ शृणुब्रह्मन्प्रवक्ष्यामिचिरायुर्मुनिसतमः ॥ सं
जातःकर्म्मणायेनव्याधिमृत्युविवार्जितः ॥५॥ तस्मिन्नेकार्णवेघोरेसलिलौघपरिप्लुते ॥ कृतान्तभयनाशा
यस्तुतोमृत्युंजयःशिवः ॥६॥तस्यसंकीर्तनान्नित्यंमुनिर्मृत्युविवर्जितः ॥ तमेवकीर्तयब्रह्मन्मृत्युंजेतुंनसं
शयः ॥ लोमशउवाच ॥ ॐ देवाधिदेवदेवेशसर्वप्राणभृतांवर ॥ प्राणिनामपिनाथस्त्वंमृत्युंज
यनमोऽस्तुते ॥८॥देहिनांजीवभूतोऽसिजीवोजीवस्यकारणम् ॥जगतांरक्षकस्त्वंवैमृत्युंजयनमोऽस्तुते९
हिमाद्रिशिखराकारसुधावीचिमनोहर॥ पुण्डरीक परंज्योतिर्मृत्युंजयनमोऽस्तुते १० ध्यानाधारमहाज्ञा
नसर्वज्ञानैककारण॥परित्रातासिलोकानांमृत्युंजयनमोऽस्तुते११॥निहतायेनकालेनसदेवासुरमानुषाः॥

गन्धर्वाप्सरसश्चैवसिद्धविद्याधरास्तथा ॥ १२ ॥ साध्याश्चवसवोरुद्रास्तथाश्विनिसुतावुभौ॥मरुतश्चदि
शोनागाःस्थावराजङ्गमास्तथा॥१३॥जितः सोऽपित्वयाध्यानान्मृत्युंजयनमोऽस्तुते॥१४॥येध्यायंति
परांमूर्तिंपूजयंत्यमराधिप ॥ नतेमृत्युवशंयांतिमृत्युंजयनमोऽस्तुते॥१५॥ त्वमोंकारोऽसिवेदानांदेवानां
चसदाशिवः ॥आधारशक्तिःशक्तीनांमृत्युंजयनमोऽस्तुते॥१३॥स्थावरेजंगमेवापियावत्तिष्ठतिमेदिनी॥
जीवत्वित्याहलोकोऽयंमृत्युंजयनमोऽस्तुते१७सोममूर्यांग्निमध्यस्थव्योमव्यापिन्सदाशिव॥कालत्रयम
हाकालमृत्युंजयनमोऽस्तुते१८प्रबुद्धेचाप्रबुद्धंचत्वमेवसृजसेजगत्॥सृष्टिरूपेणदेवेशमृत्युंजयनमोऽस्तुते
॥ १९ ॥व्योम्नित्वंव्योमरूपोऽसितेजःसर्वत्रतेजसि॥प्राणिनांज्ञानरूपोऽसिमृत्युंजयनमोऽस्तुते॥२०॥ज
गज्जीवोजगत्प्राणःस्रष्टात्वंजगतःप्रभुः॥कारणंसर्वतीर्थानांमृत्युंजयनमोऽस्तुते॥२१॥नेतात्वमिंद्रियाणां
चसर्वज्ञानप्रबोधकः॥ सांख्ययोगश्चहंसश्चमृत्युंजयनमोऽस्तुते ॥ २२ ॥ रूपातीतःसुरूपश्चपिंडस्थपदमे
वच॥चतुर्भुंगकलाधारमृत्युंजयनमोऽस्तुते॥२३॥रेचकेवह्निरूपोऽसिसोमरूपोऽसिपूरके ॥ कुम्भकेशिव
रूपोऽसिमृत्युंजयनमोऽस्तुते॥२४॥क्षयंकरोपिपापानांपुण्यानामपिवर्धनम्॥ हेतुस्त्वंश्रेयसान्नित्यंमृत्युं

जयनमोऽस्तुते॥२५॥सर्वमायाकलातीतसर्वेंद्रियपरावग॥सर्वेंद्रियकलाधीशमृत्युंजयनमोऽस्तुते २६॥
रूपंगंधोरसःस्पर्शःशब्दसंस्कारएवच ॥ त्वत्तःप्रकाशएतेषांमृत्युंजयनमोऽस्तुते ॥२७ ॥ चतुर्विधानांसृष्टी
नांहेतुस्त्वंकारणेश्वरः ॥भावाभावपरिच्छिन्नमृत्युंजयनमोऽस्तुते॥२८॥त्वमेकोनिष्कलोलोकेसकलंभुव
नत्रयम् ॥ अतिसूक्ष्मातिरूपस्त्वंमृत्युंजयनमोऽस्तुते ॥२९॥ त्वंप्रबोधस्त्वमाधारस्त्वद्बीजंभुवनत्रयम्॥
सत्वंग्जस्तमस्त्वंहिमृत्युंजयनमोऽस्तुते॥३०॥त्वंसोमस्त्वंदिनेशश्चत्वमात्माप्रकृतेःपरः ॥ अष्टत्रिंशत्क
लानाथमृत्युंजयनमोऽस्तुते ॥३१॥सर्वेंद्रियाणामाधारःसर्वभूतगुणाशयः ॥सर्वज्ञानमयानंतमृत्युंजयन
मोऽस्तुते॥३२॥त्वमात्मासर्वभूतानांगुणानांत्वमधीश्वरः॥सर्वानन्दमयाधारमृत्युंजयनमोऽस्तुते ३३॥
त्वंयज्ञःसर्वयज्ञानांत्वंबुद्धिर्बोधलक्षणा॥शब्दब्रह्मत्वमोङ्कारोमृत्युंजयनमोऽस्तुते ॥ ३४ ॥ श्रीसदाशिव
उवाच ॥ ॥ एवंसङ्कीर्तयेद्यस्तुशुचिस्तद्गतमानसः ॥भक्त्यावृणोतियोब्रह्मन्नसमृत्युवशोभवेत् ॥ ३५ ॥
नतुमृत्युभयंतस्यप्राप्तकालंचलंघयेत् ॥अपमृत्युभयंतस्यप्रणश्यतिनसंशयः॥ ३६ ॥व्याधयोनोपपद्य
न्तेनोपसर्गभयंभवेत्॥प्रत्यासन्नान्तरेकालेशतैकावर्त्तनेकृते ॥३७॥ मृत्युर्नजायतेतस्यरोगान्मुंचतिनि

श्चितम्॥पंचम्यांवादशम्यांवापौर्णमास्यामथापिवा ॥ ३८ ॥ शतमावर्त्तयेद्यस्तुशतवर्षंसजीवति॥तेज स्वीबलसम्पन्नोलभतेश्रियमुत्तमाम्॥ ३९ ॥त्रिविधंनाशयेत्पापंमनोवाक्कायसम्भवम्॥अभिचाराणिक र्माणिकर्माण्याथर्वणानिच ॥क्षीयन्तेनात्रसंदेहोदुःस्वप्नंचविनश्यति ॥ ४० ॥ इदंरहस्यंपरमंदेवदेवस्यशू लिनः॥दुःखप्रणाशनंपुण्यंसर्वविघ्नविनाशनम् ॥ ४१॥इतिश्रीशिवब्रह्मसंवादे श्रीमृत्युंजयस्तोत्रंसंपूर्णम्

॥ श्रीसदाशिवार्पणमस्तु ॥

इदं पुस्तकं मुम्बय्यां क्षेमराज–श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेंकटेश्वर" स्टीम्–यन्त्रागारे मुद्रितम् । संवत् १९८३, शके १८४८.

कर्मकाण्डप्रयोगादि-ग्रन्थाः ।

नाम	की रु आ
अष्टशान्ति-इसमें-१ सूर्यादिग्रह, २ सप्त-ग्रहीयोग, ३ मघारेवत्यादि, ४ ज्व-रादिरोगोत्पत्ति, ५ सर्वनक्षत्र, ६ ग्रहण, काकमथुनदशन और ८ पल्ली-सरठपतन ये आठ शान्ति हैं ...	०-२
अष्टलिङ्गतोभद्रगंगीन	०-२
अथर्ववद-कौशिक सूत्रानुसारीआह्निक-गुजराती भाषाटीका समेत ...	१-८
अन्त्येष्टीश्राद्धकर्मपद्धति०पं-चतुर्थीला-लजीकृत नूतन छपकर तैयारहै ...	१-४
आह्निकसूत्रावली-यजुर्वेदी-प्रातःस्मरण-सेलेकर शयनपर्यंतके सब कर्मप्रयोग-एकत्र कियेगयेहैं	२-८
आश्लेषाशान्ति और ज्येष्टाशान्ति-इस-में-आश्लेषा और ज्येष्टानक्षत्रमें शा-न्तिका प्रयोग	०-२

नाम.	की. रु. आ.
उपाकर्मपद्धति–अर्थात् (श्रावणशुक्ल १५ की) शुक्लयजुर्वेदियोंकी श्रावणी इसमें–नूतन यज्ञोपवीत धारण करने का तथा स्नानविधिसमेत प्रयोग लिखाहै	०–१२
ऋग्वेद–सांख्यायन शाखाका आह्निक गुजराती भाषाटीकासमेत ...	१–८
एकलिङ्गतोभद्र–रंगीन	०–२
कात्यायनीशान्ति–अर्थात् कात्यायन सूत्रानुसारी ग्रहशान्तिप्रयोग ...	०–२
कात्यायनीतर्पण–बडा ...	०–२
कुंडविंशतिसंग्रह–	१–४
कुशकण्डिकाभाष्य–इसमें–कुण्ड और स्थण्डिलादिकी विधि,ब्रह्मास्थापन आदिविषयहैं	०–४
गयायात्रापद्धति-(गयाजीमें-श्राद्धादिक-करनेकी विधि है)	०–४
ग्रहशांन्ति–(शुक्लयजुर्वेदोक्त)यहयज्ञोपवीत तथा विवाहादि शुभकर्ममें-बहुत उपयोगीहै	०–१०

नाम	की. रु. आ.
गौडीयश्राद्ध प्रकाशमहानिबन्ध–इसमें श्राद्धस्वरूप, श्राद्धमें ब्राह्मणलक्षण, महालयादि निर्णय और श्राद्धप्रयोग, क्षयाहश्राद्ध, संकल्पश्राद्ध, हेमश्राद्ध,	

नाम.	की रु. आ
एकादशादिश्राद्ध, मासिक श्राद्ध, मघादिश्राद्ध, तथानान्दिश्राद्धादि बहुतसे श्राद्ध और विष्ण्वादिपूजन पितृतर्पणादिअपूर्व संग्रह हैं। चारोंवर्णोंको उपयोगीहै	४–०

पुस्तक मिलनेका पता–

खेमराज श्रीकृष्णदास "श्रीवेंकटेश्वर" स्टीम्–प्रेस बम्बई.	गंगाविष्णु श्रीकृष्णदास. "लक्ष्मीवेङ्कटेश्वर" प्रेस कल्याण–बम्बई.

इस पुस्तकको खेमराज श्रीकृष्णदासने खेतवाडी७वीं गली खम्बाटालेन स्वकीय"श्रीवेङ्कटेश्वर"स्टीम प्रेस बंबईमें अपने लिये छापकर यहीं प्रकाशित किया

॥इति वेदोक्तशिवार्चनपद्धतिःसमाप्ता॥